# Pancharakshadevistotrani

# પઞ્ચરક્ષાદેવીસ્તોત્રાણિ

## Document Information

Text title : Pancharakshadevistotrani

File name : pancharakShAdevIstotrANi.itx

Category : devii, devI, buddha, raksha

Location : doc_devii

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# પઞ્ચરક્ષાદેવીસ્તોત્રાણિ

## ૧ મહાપ્રતિસરાસ્તોત્રં

ૐ નમઃ શ્રીમહાપ્રતિસરાયૈ ।
તથાગતાદ્યાસ્તથતાં તત્ત્વમાપુર્મહત્તરમ્ ।
ધારણીધારણાદ્યસ્યાઃ પ્રતિસરાં નમામિ તામ્ ॥ ૧॥

રણે શક્રોઽજયદ્દૈત્યાન્ ધારણીધ્વજધૃગ્ બહૂન્ ।
સઙ્ગ્રામજયદાં ભીમાં પ્રતિસરાં નમામિ તામ્ ॥ ૨॥

યત્પ્રભાવાદ્ બ્રહ્મદત્તોઽલભદ્ રાજ્યમકણ્ટકમ્ ।
સાર્વભૌમપ્રદાં દેવીં પ્રતિસરાં નમામિ તામ્ ॥ ૩॥

બદ્ધપરાધોઽપિ યદ્ભક્તો રાજ્યાધિકારમાપ્તવાન્ ।
શસ્ત્રાદિભીતિસંહર્ત્રીં પ્રતિસરાં નમામિ તામ્ ॥ ૪॥

રત્નાન્યવાપુર્વણિજો યાં સ્મૃત્વોદધિનિર્ગતાઃ ।
સર્વબાધાપ્રશમનીં પ્રતિસરાં નમામિ તામ્ ॥ ૫॥

શ્રીમહાપ્રતિસરારક્ષાદેવીસ્તોત્રં સમ્પૂર્ણમ્ ।

## ૨ મહામન્ત્રાનુસારિણીસ્તોત્રં

ૐ નમઃ શ્રીમહામન્ત્રાનુસારિણ્યૈ ।
બુદ્ધાધિષ્ઠાનતો બુદ્ધાભયદાં ભયનાશિનીમ્ ।
ભવામ્બુધિનિમગ્નાનાં નમો મન્ત્રાનુસારિણીમ્ ॥ ૧॥

યન્મન્ત્રોચ્ચારણાદેવ ષડીતયઃ સુદારુણાઃ ।
નાશં પ્રયાન્તિ વરદાં નમો મન્ત્રામુસારિણીમ્ ॥ ૨॥

મન્ત્રાનુસારિણો લોકાન્ નાન્યે મન્ત્રાદયો ગ્રહાઃ ।
પીડયન્તિ પ્રિયાંશ્ચાપિ નમો મન્ત્રાનુસારિણીમ્ ॥ ૩॥

બુદ્ધોઽભ્યભાષદ્ ગાથાસ્તા યન્મન્ત્રકથનાન્તરમ્ ।
યાભિઃ સર્વત્ર સ્વસ્તિ સ્યાન્નમો મન્ત્રાનુસારિણીમ્ ॥ ૪॥

કલૌ બુદ્ધવિહીનેઽસ્મિન્ લોકાનાં હિતમાચરેત્ ।
પાપોત્પાતપ્રશમનીં નમો મન્ત્રાનુસારિણીમ્ ॥ ૫॥

શ્રીમહામન્ત્રાનુસારિણીસ્તોત્રં સમ્પૂર્ણમ્ ।

## ૩ મહામાયૂરીસ્તોત્રં

ૐ નમઃ શ્રીમહામાયૂરીર્યૈ ।
દુષ્ટં કૃષ્ણભુજઙ્ગં ચ નરઃ સ્વાન્તિકં પાલયેત્ ।
યસ્યા મન્ત્રાનુભાવેન માયૂરીં પ્રણમામિ તામ્ ॥ ૧॥

બ્રહ્માદયો લોકપાલા યદ્ધારણ્યા સમાપ્નુવન્ ।
સ્વાનિ સ્વાન્યધિકારાણિ માયૂરીં પ્રણમામિ તામ્ ॥ ૨॥

સ્વર્ણાવભાસં શિખિનં નાલભજ્જપિનં કુધીઃ ।
અમોઘેનાપિ પાશેન માયૂરીં પ્રણમામિ તામ્ ॥ ૩॥

યન્મન્ત્રજપતો જીવાઃ પ્રાજીવઞ્છુષ્કપાદપાઃ ।
મૃતસઞ્જીવિનીં દેવીં માયૂરીં પ્રણમામિ તામ્ ॥ ૪॥

યન્મન્ત્રિસઙ્ગાત્ પવનો મહોપદ્રવશાન્તિકૃત્ ।
બુદ્ધાનાં બોધિદાં નિત્યં માયૂરીં પ્રણમામિ તામ્ ॥ ૫॥

શ્રીમહામાયૂરીરક્ષાદેવીસ્તોત્રં સમ્પૂર્ણમ્ ।

## ૪ મહાશીતવતીરક્ષાદેવીસ્તોત્રં

ૐ નમો મહાશીતવત્યૈ ।
યદ્ધારણીમનુજપન્ રાહુલો ભદ્રમાપ્નવાન્ ।
વિહેઠિતો ગ્રહૈઃ સર્વૈઃ શીતવતીં નમામ્યહમ્ ॥ ૧॥

પાપતાપે શીતકરીં શીતલાદ્યુપસર્ગતઃ ।
શીતોષ્ણદુઃખશમનીં શીતવતીં નમામ્યહમ્ ॥ ૨॥

મન્ત્રગ્રન્થિતસૂત્રાણાં ધારણાલ્લક્ષયોજનમ્ ।
પથિકાનાં પાલયિત્રીં શીતવતીં નમામ્યહમ્ ॥ ૩॥

શ્મશાનસ્થેન મુનિના યા સમુચ્ચારિતા પુરા ।
ગ્રહોપદ્રવશાન્ત્યર્થં શીતવતીં નમામ્યહમ્ ॥ ૪॥

ગ્રહાભિભૂતવાતાનાં ગ્રન્થિપદવિધારિણામ્ ।
ગ્રહભીતિપ્રશમનીં શીતવતીં નમામ્યહમ્ ॥ ૫॥

શ્રી મહાશીતવતીરક્ષાદેવીસ્તોત્રં સમ્પૂર્ણમ્ ।

## ૫ મહાસાહસ્રપ્રમર્દિનીસ્તોત્રં

ૐ નમઃ શ્રીમહાસાહસ્રપ્રમર્દિન્યૈ ।
મહાસાહસ્રિકે લોકે સાહસ્રહિતકારિણામ્ ।
સહસ્રસત્ત્વજનનીં નૌમિ સાહસ્રમર્દિનીમ્ ॥ ૧॥

સોપદ્રવાયાં વૈશાલ્યાં મહોત્સવો યતઃ સદા ।
મહોપસર્ગશમનીં નૌમિ સાહસ્રમર્દિનીમ્ ॥ ૨॥

યક્ષરાક્ષસભૂતાનાં દમનીં દુષ્ટચેતસામ્ ।
દુરિતોપદ્રવહતાં નૌમિ સાહસ્રમર્દિનીમ્ ॥ ૩॥

યદ્ધારણીપઠનતો રક્ષિતઃ શાક્યકેશરી ।
વિષતો વિષદિગ્ધાં તાં નૌમિ સાહસ્રમર્દિનીમ્ ॥ ૪॥

મધુમિશ્રિતભૈષજ્યં સર્વરોગનિવારણમ્ ।
મૃતસઞ્જીવનં લોકે નૌમિ સાહસ્રમર્દિનીમ્ ॥ ૫॥

ઇતિ શ્રીમહાસાહસ્રમર્દિનીરક્ષાદેવીસ્તોત્રં સમ્પૂર્ણમ્ ॥

*Pancharakshadevistotrani*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*